योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १८०

श्रीराम उवाच ।।

इमं मे संशयं छिन्धि भगवन्भास्करं तमः ।

भुवनस्येव भावानां सम्यग्रूपानुभूतये ।। १

कदाचिदहमेकाग्रो विद्यागेहे विपश्चिताम् ।

संसदि स्थितवान्यावत्तापसः कश्चिदागतः ।। २

विद्वान्द्विजवरः श्रीमान्विदेहजनमण्डलात् ।

महातपाः कान्तियुतो दुर्वासा इव दुःसहः ।। ३

स प्रविश्याभिवाद्याशु सभामाभास्वरद्युतिम् ।

उपविश्यासने तिष्ठन्नस्माभिरभिवादितः ।। ४

वेदान्तसांख्यसिद्धान्तवादान्संहृत्य सत्तमम् ।

सुखोपविष्टं विश्रान्तं तमहं पृष्टवानिदम् ।। ५

दीर्घाध्वना परिश्रान्तः सयत्न इव लक्ष्यसे ।

वदाद्य वदतां श्रेष्ठ कुत आगमनं कृतम् ।। ५

ब्राह्मण उवाच ।

एवमेतन्महाभाग सुमहायत्नवानहम् ।

यदर्थमागतोऽस्मीह तस्याकर्णय निर्णयम् ।। ७

वैदेहो नाम देशोऽस्ति सर्वसौभाग्यसंयुतः ।

स्वर्गस्याम्बरसंस्थस्य प्रतिबिम्वमिवावनौ ।। ८

तत्राहं ब्राह्मणो जातः प्राप्तविद्यश्च संस्थितः ।

कुन्दावदातदन्तत्वात्कुन्ददन्त इति श्रुतः ।। ९

अथाहं जातवैराग्यः प्रविहर्तुं प्रवृत्तवान् ।

देवद्विजमुनीन्द्राणां संभ्रमाच्छ्रमशान्तये ।। १०

श्रीपर्वतमखण्डेहं कदाचित्प्राप्तवानहम् ।

तत्रावसं चिरं कालं मृदु दीर्घं तपश्चरन् ।। ११

तत्रास्त्यरण्यं विदितं मुक्तं तृणवनादिभिः ।

त्यक्ततेजस्तमोभ्रादिभूमाविव नभस्तलम् ।। १२

तत्रास्ति मध्ये विटपी लघुः पेलवपल्लवः ।

स्थित एषोऽम्बरे शून्ये मन्दरश्मिरिवांशुमान् ।। १३

लम्बते तस्य शाखायां पुरुषः पावनाकृतिः ।

भानुर्भानाविव रश्मिगृहीतो ग्रथिताकृतिः ।। १४

मौञ्जदामनिबद्धोर्ध्वपादो नित्यमवाक्शिराः ।

अष्ठीलत्वं दधदिव महाष्ठीलस्य शाल्मलेः ।। १५

दृष्टः प्राप्तेन तं देशं स कदाचिन्मया पुमान् ।

विचारितो निकटतो वक्षःस्थाञ्जलिसंपुटः ।। १६

यावज्जीवत्यसौ विप्रो निःश्वसित्यहताकृतिः ।

शीतवातातपस्पर्शान्सर्वान्वेत्ति च कालजान् ।। १७

अनन्तरमसावेको नोपचर्य मया बहून् ।

दिवसातपखेदेन विश्रम्भे पातितः शनैः ।। १८

पृष्टश्च कोऽसि भगवन्किमर्थं दारुणं तपः ।

करोषीदं विशालाक्ष लक्ष्यालक्ष्यात्मजीवितः ।। १९

अथ तेनोक्तमर्थस्ते क इवानेन तापस ।

अर्थे नातिविचित्रा हि भवन्तीच्छाः शरीरिणाम् ।।२०

इत्युक्तवान्प्रयत्नेन सोऽनुबन्धेन वै मया ।

यदा पृष्टस्तदा तेन ममोक्तमिदमुत्तरम् ।। २१

मथुरायामहं जातो वृद्धिं यातः पितुगृहे ।

बाल्ययौवनयोर्मध्ये स्थितः पदपदार्थवित् ।। २२

समग्रसुखसंभारकोशो भवति भूमिपः ।

इत्यहं श्रुतवांस्तत्र भोगार्थी नवयौवनः ।। २३

अथ सप्तमहाद्वीपविस्तीर्णाया भुवः पतिः ।

स्यामित्यहमुदारात्मा परिबिम्बितवांश्चिरम् ।। २४

इत्यर्थेन समागत्य देशमित्थमहं स्थितः ।

अत्र द्वादश वर्षाणि समतीतानि मानद ।। २५

तदकारणमित्र त्वं गच्छेष्टं देशमाशुगः ।

अहं चाभिमतप्राप्तेरित्थमेव दृढस्थितिः ।। २६

इति तेनाऽहमुक्तः संस्तमित्थं प्रोक्तवाञ्छृणु ।

आश्चर्यश्रवणे चेतः खेदमेति न धीमतः ।। २७

साधो यावत्त्वया प्राप्तो न नामाभिमतो वरः ।

त्वद्रक्षापरिचर्यार्थमिह तावदहं स्थितः ।। २८

मयेत्युक्ते स पाषाणमौनवानभवच्छमी ।

निमीलितेक्षणः क्षीणरूपस्त्वकलनो बहिः ।। २९

तथाहं पुरतस्तस्य काष्ठमौनवतोऽवसम् ।

षण्मासान्विगतोद्वेगं वेगान्कालकृतान्सहन् ।। ३०

अर्कबिम्बाद्विनिष्कम्य तत्प्रदेशान्तरे स्थितम् ।

एकदा दृष्टवानस्मि पुरुषं भानुभास्वरम् ।। ३१

स तेन पूज्यते यावन्मनसा कर्मणा मया ।

उवाच तावद्वचनममृतस्यन्दसुन्दरम् ।। ३२

शाखाप्रलम्बनपर हे ब्रह्मन्दीर्घतापस ।

तपः संहर संहारि गृहाणाभिमतं वरम् ।। ३३

सप्ताब्धिद्वीपवलया पालयिष्यसि मेदिनीम् ।

सप्तवर्षसहस्राणि देहेनानेन धर्मतः ।। ३४

एवं समीहितं दत्त्वा स द्वितीयो दिवाकरः ।

गन्तुमस्तमथार्काब्धिमविशत्प्रोदितो यतः ।। ३५

तस्मिन्याते मया प्रोक्तं तस्य शाखातपस्विनः ।

श्रुतदृष्टानुभूताग्र्यवरदस्य विवेकिनः ।। ३६

संप्राप्ताभिमतं ब्रह्मंस्तरुशाखावलम्बनम् ।

तपस्त्यक्त्वा यथाप्राप्तं व्यवहारं समाचर ।। ३७

एवमङ्गीकृतवतः पादौ तस्य मया ततः ।

मुक्तौ विटपिनस्तस्मादालानात्कालभाविव ।। ३८

स्नातः पवित्रहस्तोऽसौ चक्रे जप्त्वाघमर्षणम् ।

फलेन पुण्यलब्धेन विटपाद्व्रतपारणम् ।। ३९

तत्पुण्यवशतः प्राप्तैः स्वादुभिस्तैस्तरोः फलैः ।

समाश्वस्तावसंक्षुब्धावावां तत्र दिनत्रयम् ।। ४०

सप्तद्वीपसमुद्रमुद्रितदिश भोक्तुं समग्रां महीं

विप्रः पादपलम्बितेन वपुषा तप्त्वोर्ध्वपादस्तपः ।

संप्राप्याभिमतं वरं दिनकृतो विश्वस्य चाह्नां त्रयं सार्धं मत्सुहृदा स्वमेवसदनं गन्तुं प्रवृत्तोऽभवत्

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे. मो. नि० उप ब्रह्मगीतासु तापसोपाख्यानं नामाशीत्यधिकशततमः सर्गः ।।

१८० ।।